## दधातेर्हिः । (४२/३०७६)

[1]दधातेरङ्गस्य हि इत्ययमादेशो भवति तकारादौ किति प्रत्यये परतः । हितः । हितवान् । हित्वा ॥

## जहातेश्च क्त्वि । (४३/३३३१)

जहातेरङ्गस्य हि इत्ययमादेशो भवति क्त्वाप्रत्यये परतः । हित्वा राज्यं वनं गतः । हित्वा गच्छति । जहातेर्निदेशात् जिहीतेर्न भवति । हात्वा ॥

## विभाषा छन्दसि । (४४/३५९३)

[2]जहातेरङ्गस्य विभाषा हि इत्ययमादेशो भवति छन्दसि विषये क्त्वाप्रत्यये परतः । हित्वा शरीरं (तै.ब्रा. २.५.६.५) यातव्यम् । हात्वा ॥

## सुधितवसुधितनेमधितधिष्वधिषीय च । (४५/३५९४)

सुधित वसुधित नेमधित धिष्व धिषीय इत्येतानि छन्दसि विषये निपात्यन्ते । तत्र सुधित वसुधित नेमधित इति सुवसुनेमपूर्वस्य दधातेः [3]क्तप्रत्यय इत्त्वम् इडागमो वा प्रत्ययस्य निपात्यते । 'गर्भं माता सुधितम्' । (ऋ. १०.२७.१६) । सुहितम् इति प्राप्ते । वसुधितमग्नौ जुहोति । वसुहितमिति प्राप्ते । नेमधिता (ऋ. १०.९३. १३) बाधन्ते । नेमहिता इति प्राप्ते । धिष्व इति लोण्मध्यमैकवचने दधातेः [4]इत्त्वम् इडागमो वा प्रत्ययस्य द्विर्वचनाभावश्च निपात्यते । 'धिष्व स्तोमम्' (ऋ. ८.३३.१५) । धत्स्व इति प्राप्ते । धिषीय इति आशीर्लिङि आत्मनेपदोत्तमैकवचने दधातेः इत्त्वम्, इडागमो वा [5]प्रत्ययस्य निपात्यते । 'धिषीय' (तै. १.६.४.४) । धासीय इति प्राप्ते ॥

## दो दद् घोः । (४६/३०७७)

[6]दा इत्येतस्य घुसञ्ज्ञकस्य दद् इत्ययमादेशो भवति तकारादौ किति प्रत्यय परतः । दत्तः । दत्तवान्[7] । दत्तिः । घः इति किम् ? धीतः । धीतवान् । धेटः एतद् रूपम् । घोः इति किम् ? 'दाप् लवने' (धा. पा. १०६०) – दातं बर्हिः । 'दैप् शोधने' (धा.पा. ९२५) – अवदातम् [8]मुखम् । अयमादेशः थान्तः इष्यते । एवं ह्युक्तम् –

तान्ते दोषो दीर्घत्वं स्याद् दान्ते दोषो निष्ठानत्वम् ।
धान्ते दोषो धत्वप्राप्तिस्थान्तेऽदोषस्तस्मात् थान्तम् ॥ (म.भा. ३.३५०–३५१)

यदि तु दस्ति इति तकारादौ दीर्घत्वं तदा तान्तेऽपि अदोषः । दान्तधान्तयोरपि 'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य' (व्या.प. १२) इति नत्वधत्वे न भविष्यतः इति [9]न दोषः ।

---

1. किति इति वर्तते इत्यधिकम् ड. 2. घुमास्थागापाजहातिसां हलि इति इत्वे प्राप्ते सूत्रमिदम् इत्यधिकम् ह. 3. क्त नास्ति क, क्तप्रत्ययस्य ड. 4. द्विर्वचनाभावः इत्वं च ड. 5. सीयुट् इत्यधिकम् ड. 6. ति इति किति इति च वर्तते इत्यधिकम् ह. 7. दत्त्वा इत्यधिकम् ड. 8. बुसम् ड. 9. अदोषः क.